भ्रण, शब्दे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट्।) रेफयुक्तः। भ्रणति। इति दुर्गादासः ॥

भ्रन्श, इर् य उ अधःपते। इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट्।) भ्रश्यति। इर् अभ्रशत्। अभ्रंशीत् ॥

भ्रन्श, ऌ उ ङ अधःपते। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०सेट्।) ऌ अभ्रशत्। उ भ्रंशित्वा भ्रष्ट्वा। ङ भ्रंशते। इति दुर्गादासः ॥

भ्रम, इर् चाले। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट्।) इर् अभ्रमत् अभ्रमीत्। इति दुर्गादासः ॥

भ्रम, भ य चाले। इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट्।) भ य भ्राम्यति। इति दुर्गादासः ॥

भ्रम, उ ज ण चाले। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट्।) उ भ्रमित्वा भ्रान्त्वा। ज भ्रामः भ्रमः। ज्वलादित्वाणप्रत्ययेऽपि जनवध इत्यादिना ह्रस्वे भ्रम इत्येव। तेन ज्वलादावस्य पाठो निष्फल इति धातुप्रदीपादयः। वस्तुतस्तु। ज्वलादिपाठसामर्थ्यान्न ह्रस्वः। ण भ्रेमतुः बभ्रमतुः। य भ्रम्यति भ्रमति। चाल इह पादविहरणम्।
"न जाने को हेतुर्भ्रमति विपिने भिक्षुक इव।"
भ्रेमुः शिलोच्चयान् भीमानित्यत्र गत्यर्थविवक्षया सकर्म्मकत्वम्। इति दुर्गादासः ॥

भ्रमः, पुं, (भ्रमु अनवस्थाने इति। भ्रम+भावे घञ्।) मिथ्याज्ञानम्। (यथा, राजतरङ्गिण्याम्। ३। ४२३।
"देवो जगाद तं भद्र! कोऽयं ते मनसि भ्रमः॥")
तत्पर्य्यायः। भ्रान्तिः २ मिथ्यामतिः ३। इत्यमरः। १। ५। ४। अम्बुनिर्गमः। कुन्दः। (यथा, रघौ। ६। ३२।
"अवन्तिनाथोऽयमुदग्रबाहु-
र्विशालवक्षास्तनुवृत्तमध्यः।
आरोप्य चक्रभ्रममुष्णतेजा-
स्त्वष्ट्रेव यत्नोल्लिखितो विभाति॥"
"चक्रभ्रमं चक्राकारशस्त्रोत्तेजनयन्त्रम्।
भ्रमोऽम्बुनिर्गमे भ्रान्तौ कुन्दाख्ये शिल्पियन्त्रके॥"
इति तट्टीकायां मल्लिनाथः॥)
भ्रमणम्। इति मेदिनी। मे, २०॥ (यथा, कथासरित्सागरे। २७। ४६।
"एवं क्रिसोक्ता वत्रजत् तं भ्रमाय वणिक्-
सुतम्।")
न्यायमते भ्रमस्य नामान्तरं अप्रमा। भ्रमो-द्विविधः। विपर्य्यासः संशयश्च। आद्यो यथा। देहे आत्मबुद्धिः। शङ्खादौ पीततामतिः। सा निश्चयरूपा। द्वितीयो यथा। किंस्विन्नरो वा स्थाणुर्वा इत्यादिबुद्धिः। तस्य कारणम्। पित्तदूरत्वमोहभयादिनानाविधदोषः। यथा,
"अप्रमा च प्रमा चेति ज्ञानं द्विविधमुच्यते।
तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता॥
तत्प्रपञ्चो विपर्य्यासः संशयोऽपि प्रकीर्त्तितः।
आद्यो देहे यात्मबुद्धिः शङ्खादौ पीततामतिः॥
भवेन्निश्चयरूपा सा संशयोऽथ प्रदर्श्यते।
किंस्विन्नरो वा स्थाणुर्व्वेत्यादिबुद्धिस्तु संशयः॥
तदभावप्रकारा धीस्तत्प्रकारा तु निश्चयः।
स संशयो भवेद्‌ या धीरेकत्राभावभावयोः॥
साधारण्यादिधर्म्मस्य ज्ञानं संशयकारणम्।
दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत्॥
पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः।"
इति भाषापरिच्छेदः। १२७—१३२ ॥
(भ्रमणशीले, त्रि॥ यथा, ऋग्वेदे। ६। ६। ४।
"अध भ्रमस्त उर्व्विया विभाति
यातयमानो अधिसानुपृश्निः॥"
"भ्रमो भ्रमणशीलो ज्वालासमूहः॥" इति तद्भाष्ये सायनः॥ रोगविशेषः। तद्यथा,—
"मूर्च्छा पित्ततमःप्राया रजःपित्तानिलाद्‌भ्रमः।
चक्रवद्‌भ्रमतो गात्रं भूमौ पतति सर्व्वदा।
भ्रमरोग इति ज्ञेयो रजःपित्तानिलात्मकः॥"
इति वैद्यकमाधवकृतरुग्विनिश्चये मूर्च्छाधिकारे॥
तथाचास्य चिकित्सा॥
"शतावरी बलामूलद्राक्षासिद्धं पयः पिबेत्।
ससितं भ्रमनाशाय बीजं वात्यालकस्य च॥
पिबेद्दुरालभाक्वाथं सघृतं भ्रमशान्तये।
त्रिफलायाः प्रयोगो वा प्रयोगः पयसोऽपि वा॥
इति वैद्यकचक्रपाणिसंग्रहे मूर्च्छाद्यधिकारे॥)

भ्रमणं, क्ली, (भ्रम+भावे ल्युट्।) गमनविशेषः। पर्य्यटनम्। (यथा, भाषापरिच्छेदे। ७।
"भ्रमणं रेचनं स्यन्दनोर्द्ध्वज्वलनमेव च॥"
पुनःपुनर्गमनम्। यथा, देवीभागवते। १। १४। ४६॥
"संसारेऽस्मिन्महाघोरे भ्रमणं नभचक्रवत्॥"
तथाच, कामन्दकीये। १४। २४।
"नवाग्निधूमसंरोधो दिङ्‌मोहो भ्रमणानि च॥"
"भ्रमणानि दिग्भ्रमात् दुर्गमप्रदेशेषु चंक्रमणानि।"
भ्रमत्यस्मिन्ननेनेति वा। भ्रम+ल्युट्।) मण्डलम्। यथा, सूर्य्यसिद्धान्ते। १२। ७६।
"कालेनाल्पेन भ्रमणं भुङ्क्तेऽल्पभ्रमणाश्रितः।
ग्रहः कालेन महता मण्डले महति भ्रमन्॥"
अल्पभ्रमणं स्वल्पपरिधिमण्डलमानमित्यर्थः। उत्तरपदे मण्डले महतीति दर्शनात्॥") हस्त्यश्वरथदोलादिद्वारा भ्रमणगुणाः। वातकोपनत्वम्। अङ्गस्थैर्य्यकरत्वम्। बलाग्निविवर्द्धनत्वञ्च। इति राजवल्लभः॥

भ्रमणी, स्त्री, (भ्राम्यति अनयेति भ्रम+करणे ल्युट्। ङीप्।) कारण्डिका। अधीशितुः क्रीड़ाख्या। इति मेदिनी। ने, ६८॥

भ्रमत्कुटी, स्त्री, (भ्रमन्ती चलन्ती कुटी क्षुद्रगृहमिव।) तृणादिच्छत्रम्। तत्पर्य्यायः। कावारी २ जङ्गलकुटी। इति त्रिकाण्डशेषः॥

भ्रमरः, पुं, (भ्रमति प्रतिकुसुममिति॥ अर्त्तिकमीत्यादिना। "उणा० ३। १३२। इति अरः।) कीटविशेषः। (यथा, रघुवंशे। ८। ३८।
"भ्रमरैः कुसुमानुसारिभिः।")
तत्पर्य्यायः। मधुव्रतः२ मधुकरः३ मधुलिट् ४ मधुपः५ अली६ द्विरेफः७ पुष्पलिट् ८ भृङ्गः ९ षट्‌पदः१० अलिः ११। इत्यमरः। २। ५। २९॥ कलालापः१२ शिलीमुखः१३ पुष्पन्धयः१४ मधुकृत् १५ द्विपः १६ भसरः १७ चञ्चरीकः १८ सुकाण्डी१९ मधुलोलुपः२० इन्दिन्दिरः२१ मधुमारकः२२। इति राजनिर्घण्टः॥ मधुपरः २३ लम्बः२४ पुष्पकीटः२५ मधुसूदनः२६ भृङ्गराजः २७ मधुलेही २८ रेणुवासः २९। इति शब्दरत्नावली॥ कामुकः। इति मेदिनी। रे, १९१॥

भ्रमरकः, पुं, (भ्रमर इवेति भ्रमर+"इवे प्रतिकृतौ।" ५। ३। ९६। इति कन्।) ललाटलम्बितचूर्णकुन्तलः। इत्यमरः। २। ६। ९६॥ (स्वार्थे कन्। भृङ्गः। बालमूषिकः। इति। मेदिनी। के, २०४॥ अम्बुभ्रमः। इति विश्वः॥

भ्रमरकीटः, पुं, (भ्रमर इव कीटः।) कीटविशेषः। कुमुरे पोका इति भाषा॥ यथा,—
"जीवन्मुक्तिस्तु तद्विद्वान् पूर्व्वोपाधिगुणांस्त्य-
जेत्।
सच्चिदानन्दधर्म्मत्वाद्‌भजेद्‌भ्रमरकीटवत्॥"
इत्यात्मबोधः॥

भ्रमरच्छल्ली, स्त्री, (भ्रमरान् छलयतीति। छलि+अच्। गौरादित्वात् ङीष्।) लताविशेषः। तत्पर्य्यायः। भृङ्गाह्वा २ भ्रमरा ३ भृङ्गमूलिका ४। अस्या गुणाः। यथा, राजनिर्घण्टे।
"भृङ्गच्छल्ली च कटुका तिक्ता दीपनरोचनी।"

भ्रमरप्रियः, पुं, (भ्रमरस्य प्रियः।) धाराकदम्बः। इति रत्नमाला॥

भ्रमरमारी, स्त्री, (भ्रमरान् मारयति गन्धोत्कर्षेण व्याकुलयतीति। मृ+णिच्+अण्। गौरादित्वात् ङीष्।) मालवदेशप्रसिद्धपुष्पवृक्षविशेषः। तत्पर्य्यायः। भ्रमरारिः २ भृङ्गारिः ३ भृङ्गमारी ४ मांसपुष्पिका ५ कुष्ठारिः ६ भ्रमरी ७ यष्टिलता ८। अस्या गुणाः। तिक्तत्वम्। पित्तश्लेष्मज्वरनाशित्वम्। शोफकण्डूतिकुष्ठव्रणदोषत्रिदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

भ्रमरा, स्त्री, (भ्रमर+अजादित्वात् टाप्।) भ्रमरच्छल्ली। इति राजनिर्घण्टः॥

भ्रमरातिथिः, पुं, (भ्रमरः अतिथिरभ्यागतो यस्य।) चम्पकः। इति राजनिर्घण्टः॥

भ्रमरानन्दः, पुं, (मधुबाहुल्यात् भ्रमराणामानन्दो यस्मात् सः।) वकुलः। अतिमुक्तकः। रक्ताम्लानः। इति राजनिर्घण्टः॥

भ्रमरालकः, पुं, (भ्रमर इव अलति भूषयतीति। अल+ण्वुल्।) ललाटस्थितचूर्णकुन्तलः। तत्पर्य्यायः। भ्रमरकः २ कुरलः ३। इति हेमचन्द्रः। ३। २३३॥

भ्रमरी, स्त्री, (भ्रमर+ङीष्।) जतुका। पुत्रदात्री। षट्‌पदी। इति राजनिर्घण्टः॥

भ्रमरेष्टः, पुं, (भ्रमराणामिष्टः।) श्योनाकप्रभेदः। इति राजनिर्घण्टः॥